# संस्कृत-वार्ता:

**दिनाङ्कः-18.04.2025** **सायम् - 06:20**

## आदौ मुख्यवार्ता:

- भारतीयान्तरिक्ष-यात्रिणं नीय भारतस्य अन्ताराष्ट्रिय अन्तरिक्षाभियानः आगामिने मासे आरप्स्यते।
- पश्चिमबङ्गालस्य विकासस्य विषये बाङ्गलादेशस्य अधिकारिभिः कृता: टिप्पण्य: भारतेन अस्वीकृता:, बाङ्गलादेशः स्वस्य अल्पसंख्याकानां अधिकाराणां च रक्षणे ध्यानं प्रददात्।
- छत्तीसगढस्य सुकमाजनपदे द्वाविंशति: माओवादिभि: आत्मसमर्पणं कृतम्।
- केन्द्रेण रडार-इति विधिक-माप-विज्ञान-नियमान्तर्गतं वाहनानां गति-मापनाय प्रयुक्तानां रडार-उपकरणानां कृते नूतना: नियमा: अधिसूचिता:।
- श्रीमद्भगवद्गीता भरत-मुनेः नाट्यशास्त्रं च यूनेस्को इति संस्थया मेमोरी ऑफ द वर्ल्ड रजिस्टर इत्यत्र समाविष्टे।
- स्क्वॉश क्रीडायां भारतस्य वीर-चोटरानी इत्येष: अद्य मलेशियाया: मोहम्मद-सयाफिक-कमालं पराजित्य उपान्त्यचक्रे प्रविष्टवान्।

**इसरो**

भारतीयान्तरिक्ष-यात्रिणं नीय भारतस्य अन्ताराष्ट्रिय अन्तरिक्षाभियानः आगामिने मासे आरप्स्यते। अन्तरिक्ष- परमाणु ऊर्जा राज्यमंत्रिणा डॉ. जितेंद्र सिंहेन आगामिषु मासेषु भारतीयान्तरिक्षानुसंधान- संघटनस्य प्रमुख-भविष्य कालिक- योजनानां समीक्षायै आयोजितस्य उच्चस्तरीयोपवेशनस्य अनन्तरं एषा घोषणा कृता। आगामी मानवान्तरिक्षयानं इसरो इत्यस्य महत्वपूर्ण श्रृंखला विषये मंत्रिणा उक्तं यत् भारतं स्वीय आगामि अंतरिक्षाभियानाय सन्नद्धम् अस्ति।

**विदशेमंत्रालयः बांग्लादशेः**

पश्चिमबङ्गालस्य विकासस्य विषये बाङ्गलादेशस्य अधिकारिभिः कृता: टिप्पण्य: भारतेन अस्वीकृता: । विदेशमन्त्रालयस्य प्रवक्ता रणधीरजयसवालः एतां टिप्पणीम् आलक्ष्य उक्तवान् यत् बाङ्गलादेशे अल्पसंख्यकानाम् उपरि प्रचलितोत्पीडनस्य विषये भारतस्य समाह्वानैः सह संबन्धं एकं छद्म-कपटपूर्णं च प्रयासः इति उक्तवान्। यत्र एतादृशेषु प्रकरणेषु संलग्नाः अपराधिनः अद्यापि मुक्ताः भ्रमन्ति। सः अवदत् यत् अनुचित-टिप्पण्यः कृत्वा सद्गुणानां प्रदर्शनं विहाय बाङ्गलादेशः स्वस्य अल्पसंख्याकानां अधिकाराणां च रक्षणे ध्यानं प्रददात्।

**छत्तीसगढ़-माओवादिन:**

छत्तीसगढस्य सुकमाजनपदे द्वाविंशति: माओवादिभि: आत्मसमर्पणं कृतम्।

एतेषु नव महिला: सन्ति। सार्धचत्वारिंशत् लक्ष-रुप्यकाणां पारितोषिकं अपि उद्घोषितं आसीत्। माओवादिभि: बलस्य केन्द्रीय-रक्षिता-रक्षि-बलस्य च वरिष्ठाधिकारिणां समक्षं आत्मसमर्पणं कृतम्। प्रत्येकं माओवादिभ्य: राज्य-प्रशासनस्य पुनर्वास-नीते: अन्तर्गतं पञ्चाशत् सहस्र रुप्यकाणां प्रोत्साहन-राशि: प्रदत्ता। एतदतिरिच्य अन्य-सौविध्यं अपि प्रदत्तम्।

**केन्द्रि-रडार-नियम**

केन्द्रेण रडार-इति विधिक-माप-विज्ञान-नियमान्तर्गतं वाहनानां गति-मापनाय प्रयुक्तानां रडार-उपकरणानां कृते नूतना: नियमा: अधिसूचिता:। उपभोक्ता-कार्य-खाद्य-सार्वजनिक वितरण-मन्त्रालयेन अद्य एकस्मिन् वक्तव्ये उक्तं यत् मार्ग सुरक्षा-यातायात-प्रर्वतने च निष्पक्षता समेधितुं उद्देश्यं निध्याय इमे नियमा: जुलाईमासस्य प्रथम-दिनात् प्रवर्तिता भविष्यन्ति।

**उपग्रहाधारित-शुल्क**

प्रशासनेन स्पष्टीकृतं यत् उपग्रहाधारित टोल-शुल्क-प्रणाली-इत्यस्य मई मासे प्रवर्तनस्य कोऽपि निर्णय नैव स्वीकृत:। अनेन सम्बद्ध संचार-सूचनानां खण्डनं विधाय पथ-परिवहन-राजमार्ग-मन्त्रालयेन उक्तं यत् न तु मन्त्रालयेन न च भारतीय-राष्ट्रीय राजमार्ग-प्राधिकरणेन अस्मिन् विषये कोऽपि निर्णय: नैव स्वीकृत।

**प्रधानमन्त्री-मस्क**

प्रधानमन्त्री नरेन्द्रमोदी अद्य टेस्ला-संस्थाया: मुख्यकार्यकारिणा एलोन् मस्क इत्यनेन सह वार्तालापं विधाय प्रौद्योगिकी-नवाचार-क्षेत्रयो: सहकार्यस्य विषये चर्चां कृतवान्। एकस्मिन् सामाजिकान्तर्जालीये सन्देशे श्रीमोदी सूचितवान् यत् तौ विविध-विषयेषु चर्चा कृतवन्तौ, यथा अस्य वर्षस्य आरम्भे वाशिङ्गटन-नगरे जाते उपवेशने उभयो: मध्ये ये विषया: समागता:, तेषां विषये चर्चा अभवत्। श्रीमोदी पुन: पुष्टिं कृतवान् यत् प्रौद्योगिकी-नवाचार-क्षेत्रयो: अमेरिकादेशेन सह सहभगिता उन्नयनाय भारतस्य प्रतिबद्धता विद्यते।

**प्रधानमन्त्री-गीता-यूनस्को**

श्रीमद्भगवद्गीता भरत-मुने: नाट्यशास्त्रं च यूनेस्को इति संस्थया मेमोरी ऑफ द वर्ल्ड रजिस्टर इत्यत्र समाविष्टे। केन्द्रीय मन्त्रिण: गजेन्द्र-सिंह-शेखावतस्य सोशल मीडिया इत्यत्र एकस्मिन् लेखस्य प्रत्युत्तरे प्रधानमन्त्रिणा नरेन्द्रमोदिना अस्य पदक्षेपस्य प्रशंसा कृता। उक्तं च यत् अनेन निर्णयेन भारतस्य कालातीत-ज्ञानं समृद्ध-संस्कृतिं च वैश्विक-मान्यता स्वीकृता। तेनोक्तं यत् गीता-नाट्यशास्त्रभ्यां शताब्देभ्य: सभ्यता-चेतना च पोषिते। आभ्यां प्राप्तान्तर्दृष्टि: संसारं प्रेरयति।

**हमास-इजरायल**

हमास इत्यनेन इजरायलस्य युद्ध-विराम-प्रस्तावः अस्वीकृतः। हमासेन युद्ध-विरामस्य स्थाने युद्ध-समाप्तेः सर्वेषां बन्धकानां च प्रदाने फिलिस्तीनी-निगृहीतानां प्रत्यावर्तनाय व्यापक-सन्धि-प्रस्तावः उपस्थापितः। इजराइलस्य प्रस्तावे पञ्च-चत्वारिंशत् दिनेभ्यः युद्ध-विरामः दश बन्धकानां मुक्तिः सम्मिलित आसीत्। हमासेन अयं निर्णयम् इस्राइलस्य प्रधानमन्त्रिणः बेंजामिन नेतन्याहू इत्यस्य राजनीतिक-पदक्षेपयुतम् एकम् आंशिक-सन्धिः इति उक्त्वा निरसितः।

**भाजपा-कांग्रेस**

पूर्व केन्द्रीय: मन्त्री अनुरागसिंह ठाकुर: अद्य नेशनल हेराल्ड प्रकरणम् आलक्ष्य कांग्रेसदलस्य आलोचनां कृतवान्। नवदिल्ल्यां अस्मिन् प्रकरणे एकं वार्ताहर-सम्मेलनं सम्बोधयता श्रीठाकुरेण उक्तं यत् नेशनल हेराल्ड इत्यस्य नाम-श्रवणेनैव कांग्रेसदलस्य सम्पूर्णे अपि परिस्थितिकीतन्त्रे अव्यवस्था समागता। स: प्रतिपादितवान् यत् कांग्रेसदलं स्वस्य पुन: प्रारम्भस्य प्रयासेषु असफल एव अस्ति। श्रीठाकुर: आरोपितवान् यत् स्वातन्त्र्यात् परं कांग्रेसदलं विभिन्नेषु वञ्चना प्रकरणे संलग्न: आसीत्।

**कलकत्ता- उच्च-न्यायालय**

कलकत्ता-उच्च-न्यायालयेन मुर्शिदाबाद् वक्फ अधिनियमम् आलक्ष्य विरोध-प्रदर्शने संजातायां हिंसायां विस्थापित-जनानाम् अभिज्ञानाय पुनर्वासाय च त्रयाणां सदस्यानां समितिः रचिता। न्यायालयेन उक्तं यत् अस्यां समित्यां राज्य-विधिक-सेवा-प्राधिकरणस्य सदस्यं सचिवम् अतिरिच्य राष्ट्रीय-मानवाधिकारायोगसस्य पश्चिम-बङ्गाल-मानवाधिकारायोगस्य च प्रत्येकं सदस्यौ भविष्यतः। समितिना मे मासस्य पञ्चदश दिनांकं यावत् प्रतिवेदनं प्रस्तोतव्यम्। न्यायमूर्तेः सोमन-सेनस्य राजा बसु चौधरी इत्यस्य च खंडपीठेन उक्तं यत् अप्रैल-मासस्य द्वादश दिनांकस्य आदेशानुसारं केन्द्रीय-सशस्त्र-आरक्षि-बलं मुर्शिदाबादस्य हिंसा-ग्रस्तक्षेत्रेषु नियुक्तं भविष्यति।

**गुड् फ्राइडे**

अद्य सम्पूर्णे विश्वे गुडफ्राइडे इति पर्व आचर्यते, दिवसोयं भगवत: येशुमसीहस्य शूले स्थापनदिवसत्वेन आमन्यते। अस्मिन् दिने येशुमसीहः मानवजातेः पाप-निवारणाय प्रेम्णः च कृते दुःखं प्राप्य स्वप्राणानां बलिदानं कृतवान्। ईस्टर-रविवासरात् पूर्वं शुक्रवासरे एतद् आचर्यते, पुनरुत्थानस्य प्रतीकभूतं भवति। प्रधानमन्त्री नरेन्द्रमोदी येशुमसीहस्य त्यागं संस्मरत्। अत्रावसरे श्री मोदी सामाजिक सञ्चारपटले अलिखत् यत् अयं दिवस: अस्मान् सदैव दया, करूणा इत्यनयो: आशयाय प्रेरयति।

## सक्वॉश

स्क्वॉश क्रीडायां भारतस्य वीर-चोटरानी इत्येष: अद्य मलेशियाया: मोहम्मद-सयाफिक-कमालं पराजित्य उपान्त्यचक्रे प्रविष्टवान्। चोटरानी इत्यनेन कमालं त्रीणी-एकं इत्यङ्कान्तरालेन पराजितम्।

## आईपीएल

आई.पी.एल. इत्येतस्यां विंशति-प्रति-विंशति क्रिकेट क्रीडायां अद्य सायं रायलचैलेन्जर्स-बेंगलुरू, पंजाबकिंग्स दलयोंमध्ये क्रीडा बेंगलुरूनगरस्य एम.चिन्नास्वामी क्रीडाङ्गणे भविष्यति। क्रीडाया: आरम्भ: सायं सार्धसप्तवादने भविष्यति। आर.सी.बी.-पञ्जाबदलयो: षड्-क्रीडासु अष्ट-अंकानि एव सन्ति। गतरात्रौ जाते द्वन्द्वे मुम्बई-इण्डियन्स इत्यनेन इलेन मुम्बय्या: वानखेडे इति क्रीडाङ्गणे सनराइजर्स-हैदराबाद इत्येतं दलं चतु: स्तोभै: पराजितम्।

## शॉट् पुटः -

सऊदी अरबस्य दम्मम्-नगरे एशिया-अण्डर-एटीन (18) एथलेटिक्स-चैम्पियनशिप्-इत्येतस्यां क्रीडायां भारतस्य षोडशवर्षीयः निश्चयः तृतीयदिने बालकानां शॉट्-पुट-स्पर्धायाम् ऊनविंशति: दशमलव पञ्च नव मीटरपरिमितस्य व्यक्तिगत-उत्तम-प्रयासेन रजत-पदकं विजितवान्।